# Shri Sadashivastavanam

# શ્રીસદાશિવસ્તવનમ્

## Document Information

Text title : Shri Sadashivastavanam

File name : sadAshivastavanam.itx

Category : shiva

Location : doc_shiva

Author : Swami Umeshvaranand Tirth

Proofread by : Paresh Panditrao, Ruma Dewan

Description/comments : Ganga Mahatmya And Stuti Ratnavali By Swami Umeshvaranand Tirth

Latest update : July 21, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 21, 2023

*sanskritdocuments.org*

# શ્રીસદાશિવસ્તવનમ્

શિવં શઙ્કરં ધ્યાનગમ્યં મહેશં
    ચલત્કુણ્ડલં શેષનાગાઙ્કિતં તમ્ ।
જટાજૂટમધ્યે લસત્વારિગાઙ્ગં
    લલાટેઽર્ધચન્દ્રં દધાનં નમામિ ॥ ૧॥

ત્રિનેત્રં સુવક્ત્રં ગલે મુણ્ડમાલં
    ત્રિપુણ્ડ્રં ચ ભાલે સુરેખાઙ્કિતાહિ ।
ચતુર્દિક પ્રકાશં રવિકોટિભાસં
    ભયં હારિણન્તં નમામિ મહેશમ્ ॥ ૨॥

જગજ્જાલસંહારકં તં સુવેષં
    પ્રચણ્ડાટ્ટહાસં પ્રકુર્વન્સુનૃત્યન્ ।
સુઢક્કાં નન્દતં જટા વિસ્ફુરન્તં
    વિભુમેકશેષં મહેશં નમામિ ॥ ૩॥

ગલે નીલવર્ણ કપાલે સુગઙ્ગાં
    તરઙ્ગાવલી શોભિતાં શુક્લવર્ણામ્ ।
દધાનૈકદેવં ભુવનૈકબન્ધું
    નટાનાં સુરાજાન્નમામિ મહેશમ્ ॥ ૪॥

સુમુદ્રાદધાનં સમાધૌ સુધ્યાનં
    સુધાસિન્ધુમધ્યેનિમગ્નં સદાત્વમ્ ।
સદાનિર્વિકલ્પં ચિદાનન્દરૂપં
    મહેશં મહાદેવ દેવં નમામિ ॥ ૫॥

શિવં શઙ્કરં શૂલપાણિં વરેણ્યં
    મૃડં ધૂર્જટિં સર્વદુઃખાપહારિમ્ ।
જગત્પૂજનીયં પ્રશાન્તં પ્રસન્નં
    નમોઽસ્તુ મહેશં સુમુક્તિ પ્રદન્તમ્ ॥ ૬॥

મહેશં સુરેશં વૃષેશં પરેશં
ગણેશેશ દેવં ફણીન્દ્રૈકમીશમ્ ।
ગજેન્દ્રસ્ય ચર્મામ્બરં શોભિતાઙ્ગં
ભવાનીપતિન્ત્વાં ભજેશાન્તમૂર્તિમ્ ॥ ૭॥

શિવં શાન્તિદં જ્ઞાનરાશિં મહેશં
જટાજૂટકં શૈલદેશેવસન્તમ્ ।
ફણીન્દ્રૈર્સદાસ્વાઙ્ગકં લાઞ્છિતં તં
કરે શૂલઢક્કાં સુસેવિં નમામિ ॥ ૮॥

સ્વધામેવસન્તમખણ્ડૈકરૂપં
ત્રિનેત્રૈર્કં દિવ્યંસુગામ્ભીર્યસિન્ધુમ્ ।
લલાટં સુભવ્યં ત્રિપુણ્ડ્રં પવિત્રં
પ્રશાન્તં સમુદ્રં નિધાનં સુજ્ઞાનમ્ ॥ ૯॥

વિભું વિશ્વવન્દ્યં શિવં શમ્ભુમેકં
સુશાન્તં સુધાનન્દદં લોકપૂજ્યમ્ ।
મહેશં વરેણ્યં શરણ્યં ચ લોકં
સદા શાન્તિદન્તં નમામીશમીડ્યમ્ ॥ ૧૦॥

સદાત્વં સુપૂજ્યં પ્રશાન્તં સ્વરૂપં
સમાધૌ સદાત્વં સુલગ્નં પ્રસન્નમ્ ।
પરામ્બા ભવાની સુસેવા પરાવા
ભજન્તં સદાત્વાં કૃતાર્થાભવિત્રી ॥ ૧૧॥

ત્રિનેત્રૈર્લસન્તં જટા વિધ્દૂનન્તં
સુનગ્નં શરીરેવિભૂતિઃ લસન્તમ્ ।
સુભાલં લસન્તં ચતુર્દિક્ભ્રમન્તં
પ્રચણ્ડાટ્ટહાસં હસન્તં વસન્તમ્ ॥ ૧૨॥

નમામિ મહેશં શિવં વિશ્વવન્દ્યમ્ ॥

શિવં શૂલપાણિં વિભું ચન્દ્રમૌલિં
મહાદેવદેવં પ્રભું શાન્તમૂર્તિમ્ ।
પ્રસન્નાનનં શુભ્રવર્ણં વરેણ્યં
નમામિ મહેશં સદા શાન્તમૂર્તિમ્ ॥ ૧૩॥

ગિરીશં મહેશં વિભુમમ્બિકેશં
ગણેશૈકમીશં શિવં કાર્તિકેશમ્ ।
વૃષસ્યૈકમીશમહીન્દ્રૈકમીશં
મહેશં સુપૂજ્યં નમામિ સદાત્વમ્ ॥ ૧૪॥

શશીખણ્ડમૌલિઃ શશીભાસભાલં
શશીકોટિવક્ત્રં શશીકાશદેહમ્ ।
સ્વયં ગૌરદેહં સુગૌરીશ શમ્ભું
સુગૌરંવૃષન્તં સુરૂઢં નમામિ ॥ ૧૫॥

ગલે નીલીમાભં શિવં શુક્લવર્ણં
સદાત્વામુદાસીન વૃતિપ્રિયોઽસિ ।
વિભૂતિં સદાત્વં નિજાઙ્ગે દધાસિ
પરિધાનમેકં સુવ્યાઘ્રામ્બરઞ્ચ ॥ ૧૬॥

સદાનિર્વિકલ્પો સમાધિસ્થદેહો
સુમાઙ્ગલ્યધ્યાનં સુમુદ્રાદધાસિ ।
સદાજ્ઞાનરાશિં સદાનન્દરાશિં
નમામિ મહેશં સદા કાશીવાસીમ્ ॥ ૧૭॥

વિશ્વેશ્વરો માધવ ઢુણ્ઢિરાજઃ
કાશીગુહાં જાહ્નવીભૈરવશ્ચ ।
સદણ્ડપાણિં મણિકર્ણિકાયૈ
વન્દે સદાશઙ્કરમમ્બિકાઞ્ચ ॥ ૧૮॥

ઇતિ શ્રી સ્વામી ઉમેશ્વરાનન્દતીર્થવિરચિતં શ્રીશિવસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Paresh Panditrao

*Shri Sadashivastavanam*

pdf was typeset on July 21, 2023

Please send corrections to *sanskrit@cheerful.com*